श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसौलभ्यचूडामणिस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसौलभ्यचूडामणिस्तोत्रम् ॥

ब्रह्मोवाच

चक्राम्भोजे समासीनं चक्राद्यायुधधारिणम्।
चक्ररूपं महाविष्णुं चक्रमन्त्रेण चिन्तयेत्॥ १ ॥

सर्वावयवसंपूर्णं भयस्यापि भयङ्करम्।
उग्रं त्रिनेत्रं केशाग्निं ज्वालामालासमाकुलम्॥ २ ॥

अप्रमेयमनिर्देश्यं ब्रह्माण्डव्याप्तविग्रहम्।
अष्टायुधपरीवारम् अष्टापदसमद्युतिम्॥ ३ ॥

अष्टारचक्रमत्युग्रं संवर्ताग्निसमप्रभम्।
दक्षिणैर्बाहुभिश्चक्रमुसलाङ्कुशपत्रिणः॥ ४ ॥

दधानं वामतश्शङ्खचापपाशगदाधरम्।
रक्ताम्बरधरं देवं रक्तमाल्योपशोभितम्॥ ५ ॥

रक्तचन्दनलिप्ताङ्गं रक्तवर्णमिवाम्बुदम्।
श्रीवत्सकौस्तुभोरस्कं दीप्तकुण्डलधारिणम्॥ ६ ॥

हारकेयूरकटकशृङ्खलाद्यैरलङ्कृतम्।
दुष्टनिग्रहकर्तारं शिष्टानुग्रहकारिणम्॥ ७ ॥

एवं सौदर्शनं नित्यं पुरुषं हृदि भावयेत्।
सौलभ्यचूडामण्याख्यं मया भक्त्या समीरितम्॥ ८ ॥

चूडायुक्तं त्रिसन्ध्यायां यः पठेत्स्तोत्रमुत्तमम्।
भयं च न भवेत्तस्य दुरितं च कदाचन॥ ९ ॥

www.prapatti.com

जले वाऽपि स्थले वाऽपि चोरदुःखमहापदि।
सङ्ग्रामे राजसंमर्दे शत्रुभिः परिपीडिते॥ १० ॥

बन्धने निगले वाऽपि सङ्कटेऽपि महाभये।
यः पठेत्परया भक्त्या स्तोत्रमेतज्जितेन्द्रियः।
सर्वत्र च सुखी भूत्वा सर्वान् कामानवाप्नुयात्॥ ११ ॥

॥ इति श्रीसौलभ्यचूडामणिस्तोत्रं संपूर्णम् ॥

www.prapatti.com